अथ

शुक्लयजुर्वेदीयषडङ्गरुद्राष्टाध्यायी

प्रारभ्यते ।

अधिकतम सूची मूल्य एक रुपया मात्र.



॥ श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य । देशकालौ संकीर्त्य च । संकल्पः।अद्य पूर्वोच्चारितैवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षासिद्धिद्वारा सर्वव्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं श्रीभवानीशङ्करदेवताप्रीत्यर्थं च रुद्रैकादशिन्यभिषेकयुक्तं सकृदावर्तनाभिषेकयुक्तं वा अमुकद्रव्येण रुद्राभिषेकमहं करिष्ये। तदङ्गतया विहितान् शरीरशुद्ध्यर्थं लघुषडङ्गन्यासाँश्च करिष्ये ॥ मनोजूतिरिति मन्त्रस्य बृहस्पतिर्ऋषिः। बृहती छन्दः। बृहस्पतिर्देवता । हृदयन्यासे जपे वि

रु. नियोगः ॥ ॐ मनोजूतिर्ज्जुषतामाज्ज्यंस्यबृहस्पतिर्य्यज्ञमिमन्तंनो
१ त्वरिष्टंय्यज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो ३ न्या.
म्प्रतिष्ठ ॥ ॐ हृदयाय नमः ॥ १ ॥ अबोध्यग्निरितिमन्त्रस्य बुधग
विष्ठिरा ऋषिः । त्रिष्टुप् छन्दः । अग्निर्देवता । शिरोन्यासे जपे विनियो
गः ॥ ॐ अबोद्ध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ।
यह्वाऽइवप्प्रवयामुज्जिहानाꣳप्प्रभानवःसिस्रतेनाकमच्छ ॥ ॐ शिरसे
स्वाहा ॥ २ ॥ मूर्द्धानमितिमन्त्रस्य भरद्वाज ऋषिः । त्रिष्टुप् छन्दः ।
अग्निर्देवता । शिखान्यासे जपे विनियोगः ॥ ॐ मूर्द्धानन्दिवोऽअरति १

ऽपृथिव्याव्वँश्वानरमृतऽआजातमग्निम् ॥ कविंᳬसम्म्राजमतिथिञ्जनानां
नामासन्नापात्रञ्जनयन्त देवाः ॥ ॐ शिखायै वषट् ॥ ३ ॥ मर्म्माणित
इतिमन्त्रस्य अप्रतिरथ ऋषिः। विराट् छन्दः। मर्म्माणि देवता। कवच
न्यासे जपे विनियोगः ॥ ॐ मर्म्माणितेव्वर्म्मणाच्छादयामिसोम
स्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्त
न्त्वानुदेवामदन्तु ॥ ॐ कवचायहुम् ॥ ४ ॥ विश्वतश्चक्षुरितिमन्त्र
स्य विश्वकर्मा भौवन ऋषिः। त्रिष्टुप् छन्दः। विश्वकर्मा देवता। नेत्रन्या
से जपे विनियोगः ॥ ॐ विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरु

ताद्विश्श्वतंस्प्पात् ॥ सम्बाहुब्भ्यान्धमंतिसम्पतंत्रैर्द्यावाभूमींजुनयंन्देव
ऽएकः ॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ मानस्तोक इतिमन्त्रस्य परमेष्ठी
ऋषिः । जगती छन्दः । एकरुद्रो देवता । अस्त्रन्यासे जपे विनियोगः
॥ ॐ मानंस्तोकेतनयेमानुऽआयुंषिमानोगोषुमानोऽअश्श्वेषुरीरिषः ॥
मानोंवीरान्रुंद्रभामिनोंवधींर्हविष्मंन्तःसदुमित्त्वांहवामहे ॥ ॐ अस्त्रा
य फट् ॥ ६ ॥ ॥ इति लघुषडङ्गन्यासाः ॥ ॥ छ ॥

॥ श्रीगणेशायनमः ॥ ॥ हरिः॑ ॐ ॥ माच्छन्दः॑ प्प्रमाच्छन्दः॑ प्प्रतिमा
च्छन्दो॑ऽअस्स्रीवयुश्छन्दः॑ पुङ्क्तिश्छन्दः॑ऽउष्णिक्छन्दो॑बृहतीच्छन्दो॑नुष्टु
प्छन्दो॑व्विराट्छन्दो॑गायत्रीच्छन्दः॑स्त्रिष्टुप्छन्दोजगतीच्छन्दः॑ ॥ १ ॥
पृथिवीच्छन्दो॑न्तरिक्षुञ्छन्दोद्यौश्छन्दः॑समाश्छन्दोनक्षत्राणिच्छ
न्दोव्वाक्छन्दोमनुश्छन्दः॑कृषिश्छन्दोहिरण्युञ्छन्दोगौश्छन्दोजाच्छ
न्दोऽश्श्वुश्छन्दः॑ ॥ २ ॥ गुणानान्त्वागुणपतिꣳहवामहेप्प्रियाणान्त्वा
प्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥ आह
मंजानिगर्भधमात्वमजासिगर्भधम् ॥ ३ ॥ गायत्रीत्रिष्टुब्जगत्यनुष्टु

रु. प्पुङ्क्त्यासुह ॥ बृहत्युष्णिहांककुप्सूचीभिः शम्म्यन्तुत्वा ॥ ४ ॥ द्वि
३ पदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदाः ॥ विच्छन्दायाश्चसच्छन्दाः अ. १
सूचीभिः शम्म्यन्तुत्वा ॥ ५ ॥ सहस्तोमाः सहच्छन्दसऽआवृतः सह
प्प्रमाऽऋषयः सप्तदैव्याः ॥ पूर्वेषाम्पन्थामनुदृश्यधीराऽअन्वालेभि
रेरत्थ्योनरश्मीन् ॥ ६ ॥ यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवै
ति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ७ ॥
येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः ॥ यदपूर्व्वंय
क्षमन्तःप्प्रजानान्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ८ ॥ यत्प्रज्ञानमुत ३

चेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋतेकिञ्चनक
र्म्मक्क्रियतेतन्मेमनः शिवसङ्कल्पमस्तु ॥ ९ ॥ येनेदम्भूतम्भुवनम्भ
विष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेम
नः शिवसङ्कल्पमस्तु ॥ १० ॥ यस्मिन्नृचः सामयजूꣳषियस्मिन्प्र
तिष्ठितारथनाभाविवाराः ॥ यस्मिꣳश्चित्तꣳसर्व्वमोतम्प्रजानान्तन्मे
मनः शिवसङ्कल्पमस्तु ॥ ११ ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनी
यतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः शिवस
ङ्कल्पमस्तु ॥ १२ ॥ इतिसꣳहितायांरुद्रपाठेप्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥

रु. सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिठंसर्वतःस्पृत्वात्यति अ.
४ ष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदठंसर्व्वठंय्यद्भूतँय्यच्चभाव्यम् ॥ उता २
मृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्ज्या
याँश्चपूरुषः ॥ पादोऽस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३ ॥
त्रिपादूर्ध्वऽउदैत्पुरुषःपादोऽस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्राम
त्साशनानशनेऽअभि ॥ ४ ॥ ततोविराडजायतविराजोऽअधिपूरुषः ॥
सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्व
हुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्याग्राम्म्या ४

श्चये ॥ ६॥ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे ॥ छन्दाᳬंसि
जज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वाऽअजाय
न्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजाव
यः ॥ ८ ॥ तँय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ॥ तेनदेवाऽअ
यजन्तसाध्याऽऋषयश्चये ॥ ९ ॥ यत्पुरुषँव्व्यदधुःकतिधाव्व्यकल्पय
न् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते ॥ १० ॥ ब्राह्म
णोस्यमुखमासीद्बाहूराजन्न्यःकृतः ॥ ऊरूतदस्ययद्वैश्श्यःपद्भ्याᳬंशू
द्द्रोऽअजायत ॥११॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥

रु. ५ श्रोत्राद्वायुश्चप्प्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसी
दन्तरिक्षꣳशीर्ष्णोद्द्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशःश्रोत्रात्तथालो अ. २
काँ२ऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥
वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्ता
स्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअब
ध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणि
प्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाध्याःसन्ति
देवाः ॥ १६ ॥ अद्भ्यःसम्भृतःपृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तता ५

ग्ग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्ग्रे ॥ १७ ॥
व्वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः पुरस्तात् ॥ तमेवविदि
त्वातिमृत्युमेतिनान्यः पन्थाविद्यतेयनाय ॥ १८ ॥ प्प्रजापतिश्चरति
गर्भेऽअन्तरजायमानोबहुधाविजायते ॥ तस्ययोनिम्परिपश्यन्तिधी
रास्तस्मिन्हतस्थुर्भुवनानिविश्वा ॥ १९ ॥ योदेवेभ्यऽआतपतियो
देवानाम्पुरोहितः ॥ पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ २० ॥
रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्या
त्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रे

पार्श्वैनक्षत्राणिरूपमश्विनौऽव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणस
र्वलोकम्मऽइषाण ॥ २२ ॥ ॥ इतिसंहितायांरुद्रपाठेद्वितीयोऽध्या
यः ॥ २ ॥ ॥ ॥ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्ष
णीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतंसेनाऽअजयत्साकमि
न्द्रः ॥ १ ॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णु
ना ॥ तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णा ॥ २ ॥ सऽ
इषुहस्तैःसनिषङ्गिभिर्वशीसंस्रष्टासयुधऽइन्द्रोगणेन ॥ संसृष्टजि
त्सोमपाबाहुशर्द्ध्युग्रधन्वाप्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पतेपरिदी

यारथेनरक्षोहामित्राँ२॥ऽअपबाधमानः ॥ प्प्रभञ्जन्त्सेनाःप्प्रमृणोयु
धाजयन्नस्माकमेद्ध्यवितारथानाम् ॥ ४ ॥ बलविज्ञायस्त्थविरःप्प्रवी
रःसहस्वान्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसत्वासहोजाजैत्र
मिन्द्ररथमातिष्ठगोवित् ॥ ५ ॥ गोत्त्रभिदङ्गोविदंवज्ज्रबाहुञ्जयन्तमज्म
प्प्रमृणन्तमोजसा ॥ इमर्ठंसजाताऽअनुवीरयद्ध्वमिन्द्रर्ठंसखायोऽअनु
सर्ठंरभद्ध्वम् ॥ ६ ॥ अभिगोत्राणिसहसागाहमानोदयोवीरःशतम
न्युरिन्द्रः ॥ दुश्च्यवनःपृतनाषाडयुद्ध्योस्म्माकर्ठंसेनाऽअवतुप्प्रयु
त्सु ॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः ॥

रु. ७ देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥ ८ ॥ इन्द्र अ. ३
स्यवृष्ष्णोव्वरुणस्यराज्ञऽआदित्यानाम्मरुताꣳशर्द्धऽउग्ग्रम् ॥ महा
मनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात् ॥ ९ ॥ उद्धर्
षयमघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳसि ॥ उद्वृत्रहन्वा
जिनाँव्वाजिनान्युद्रथानाञ्जयताँय्यन्तुघोषाः ॥ १० ॥ अस्म्माकमि
न्द्रःसमृतेषुद्ध्वजेष्ष्वस्म्माकँय्याऽइषवस्ताजयन्तु ॥ अस्म्माकँव्वी
राऽउत्तरेभवन्त्वस्म्माँ२॥ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चि
त्तम्प्प्रतिलोभयन्तीगृहाणाङ्गान्यप्प्वेपरेहि ॥ अभिप्प्रेहिनिर्द्दहहृत्सु ७

शोकैरन्धेनामित्राास्तमंसासचन्ताम् ॥ १२ ॥ अवंसृष्टापरापतशर
व्येब्रह्मंसंशिते ॥ गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः
॥ १३ ॥ प्रेताजयतानरऽइन्द्रोवःशर्म्मंयच्छतु ॥ उग्रावःसन्तुबाहवो
नाधृष्याथासथ ॥ १४ ॥ असौय्यासेनामरुतःपरेषामभ्यैतिनऽ
ओजसास्पर्द्धमाना ॥ ताङ्गूहततमसापव्रतेनयथामीऽअन्योऽअन्य
न्नजानन् ॥ १५ ॥ यत्रंबाणाःसम्पतन्तिकुमाराविशिखाऽइव ॥ तन्नऽ
इन्द्रोबृहस्पतिरदितिःशर्म्मंयच्छतुविश्वाहाशर्म्मंयच्छतु ॥ १६ ॥
मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उ

रु. रोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तुन्त्वानुदेवामदन्तु ॥ १७ ॥ ॥ इति
८ सर्ठहितायांरुद्रजाप्येतृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ व्विब्भ्राड्बृह अ.
त्पिबतुसोम्म्यम्मद्ध्वायुर्द्धद्यज्ञपतावविह्रुतम् ॥ व्वातजूतोयोऽअभिर ४
क्षतित्त्मनाप्रजाःपुपोषपुरुधाव्विराजति ॥ १ ॥ उदुत्यञ्जातवेदसन्दे
वँव्वहन्तिकेतवः ॥ दृशेव्विश्श्वायसूर्य्यम् ॥ २ ॥ येनापावकचक्षसाभु
रण्यन्तञ्जनाँ२॥ऽअनु ॥ त्वँव्वरुणपश्श्यसि ॥ ३ ॥ दैव्व्यावद्ध्वर्य्यूऽआग
तर्ठरथेनसूर्य्यत्त्वचा ॥ मद्ध्वायज्ञर्ठसमञ्जाथे ॥ तम्प्रत्क्नथायँव्वेनश्चि
त्रन्देवानाम् ॥ ४ ॥ तम्प्रत्क्नथापूर्व्वथाव्विश्श्वथेमथाज्ज्येष्ठतातिम्बर्हि ८

षदंᳬस्वार्व्विदम् ॥ प्प्रतीचीनंँव्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुयासुव्व
र्द्धसे ॥ ५ ॥ अयंँव्वेनश्चोदयत्पृश्निगर्ब्भाज्ज्योतिर्ज्जरायूरजसोव्विमाने ॥
इममपाᳬसङ्गमेसूर्य्यस्यशिशुन्नव्विप्प्रामतिभीरिहन्ति ॥ ६ ॥ चित्र
न्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यव्वरुणस्याग्नेः ॥ आप्प्राद्यावापृथि
वीऽअन्तरिक्षᳬसूर्य्यऽआत्माजगतस्तस्थुषश्च ॥ ७ ॥ आनऽइडा
भिर्व्विदथेसुशस्तिव्विश्वानरः सवितादेवऽएतु ॥ अपियथायुवानोमत्स
थानोव्विश्वञ्जगदभिपित्त्वेमनीषा ॥ ८ ॥ यदद्यकच्चव्वृत्रहन्नुदगाऽअभि
सूर्य्य ॥ सर्व्वन्तदिन्द्रतेव्वशे ॥ ९ ॥ तरणिर्व्विश्वदर्शतोज्ज्योतिष्कृदसि

रु. सूर्य्य ॥ विश्श्वमाभांसिरोचुनम् ॥ १० ॥ तत्सूर्य्यंस्यदेवुत्वन्तन्महि अ.
९ त्वम्मुद्ध्याकर्त्तोर्व्वितंतर्ठंसञ्जभार ॥ युदेदयुंक्कहुरितं÷सुधस्थादाद्रात्री ४
व्वासंस्तनुतेसिुमस्म्मै ॥ ११ ॥ तन्मिुत्रस्युव्वरुंणस्याभिचक्षेसूर्य्योरू
पङ्कृणुतेद्योरुुपस्थे ॥ अनुन्तमुन्यद्रुशंदस्युपाजं÷कृष्णमुन्यद्धुरितुःस
म्भरन्ति ॥ १२ ॥ बण्णमुहाँ २॥ऽअंसिसूर्य्युबडादित्यमुहाँ २॥ऽअंसि ॥
मुहस्तैसुतोमंहिुमापनस्यतेद्धादेवमुहाँ २॥ऽअंसि ॥ १३ ॥ बट्सू
र्य्युश्श्रवसामुहाँ २॥ऽअंसिसुत्रादेवमुहाँ २॥ऽअंसि ॥ मुह्नादेवानामसु
र्य्य÷पुरोहितोव्विभुज्ज्योतिरदाब्भ्यम् ॥ १४ ॥ श्श्रायन्तऽइवुसूर्य्युंव्वि ९

श्वोदिन्द्रंस्यभक्षत ॥ त्वसूंनिजातेजनंमानऽओजंसाप्रातिंभागन्नदी
धिम ॥ १५ ॥ अद्यादेवाऽउदितासूर्य्यस्यनिरंहसःपिपृतानिरव
द्यात् ॥ तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः
॥१६॥ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययें
नसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १७ ॥ ॥ इति संहि
तायांरुद्रपाठेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॐ नमस्तेरुद्रम
न्यवऽउतोतऽइषवेनमः ॥ बाहुभ्यामुततेनमः ॥ १ ॥ यातेरुद्रशि
वातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभि

रु. चाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्ते बिभर्ष्यस्तवे ॥ शिवाङ्गिरि
१० त्रताङ्कुरुमाहिꣳसीः पुरुषञ्जगत् ॥ ३ ॥ शिवेनवचसात्वागिरिशाच्छा अ.
वदामसि ॥ यथानः सर्वमिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥ ४ ॥ अध्यवो ५
चदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातु
धान्योऽधराचीः परासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउतबभ्रुः सुम-
ङ्गलः ॥ येचैनꣳरुद्राऽअभितोदिक्षुश्रिताः सहस्रशोऽवैषाꣳहेडऽईमहे
॥ ६ ॥ असौयोऽवसर्पतिनीलग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्रन्न
दृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ॥ ७ ॥ नमोऽस्तुनीलग्रीवायस १०

हस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्वानोहन्तेभ्योकरन्नमः ॥ ८ ॥
प्रमुञ्चधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तऽइषवःपराता
भगवोवप ॥ ९ ॥ विज्यन्धनुःकपर्दिनोविशल्योबाणवाँ २ ॥ ऽउत ।
अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ यातेहेतिर्म्मीढु
ष्टमहस्तेबभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥
॥ ११ ॥ परितेधन्वनोहेतिरस्म्मान्वृणक्तुविश्वतः ॥ अथोयऽइषु
धिस्तवारेऽअस्म्मन्निधेहितम् ॥ १२ ॥ अवतत्त्यधनुष्ट्वꣳसहस्राक्षशते
षुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोनःसुमनाभव ॥ १३ ॥ नमस्तऽ

आयुधायानाततायधृष्णवे ॥ उभाब्भ्याम्मुततेनमोबाहुब्भ्यान्तवध
न्न्वने ॥ १४ ॥ मानोमहान्तमुतमानोऽअर्ब्भकम्मानऽउक्षन्तमुतमान
ऽउक्षितम् ॥ मानोव्वधीःपितरम्मोतमातरम्मानःप्प्रियास्तन्न्वोरुद्ररी
रिषः ॥ १५ ॥ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वे
षुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवा
महे ॥१६॥ नमोहिरण्ण्यबाहवेसेनान्न्येदिशाञ्चपतयेनमोनमोव्वृक्षेब्भ्यो
हरिकेशेब्भ्यःपशूनाम्पतयेनमोनमःशष्प्पिञ्जरायत्त्विषीमतेपथीना
म्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबब्भ्लुशा

यं ॥ १७ ॥ नमो॑ बभ्लुशाय॑ व्याधिनेऽन्ना॑नुाम्पत॑येु नमोु नमो॑ भुवस्य॑ हे॒
त्यै जग॑तुाम्पत॑येु नमोु नमो॑ रुद्राया॑ततुायिनेु क्षेत्रा॑णुाम्पत॑येु नमोु नम॑ः सू॒
तायाह॑न्त्यै वना॑नुाम्पत॑येु नमोु नमोु रोहि॑ताय ॥ १८ ॥ नमोु रोहि॑ताय
स्थुपत॑ये वृ॒क्षाणुाम्पत॑येु नमोु नमो॑ भुवन्तये॑ वारिवस्कृ॒तायौष॑धीनुाम्प-
त॑येु नमोु नमो॑ मुन्त्रिणे॑ वाणिुजायु कक्षा॑णुाम्पत॑येु नमोु नम॑ऽ उुच्चैर्घो॑षा
याक्रुन्दय॑ते पत्ती॒नाम्पत॑येु नमोु नम॑ः कृत्स्नाय ॥ १९ ॥ नम॑ः कृत्स्नायु त
युा धाव॑ते सत्त्व॑नाुाम्पत॑येु नमोु नमुः सह॑मानाय निव्याधिन॑ऽ आव्याधि
नी॑नुाम्पत॑येु नमोु नमो॑ निषुङ्गिणे॑ ककुुभाय॑ स्तेुनानुाम्पत॑येु नमोु नमो॑ नि

चेरवैपरिचरायारण्यानाम्पतयेनमोनमोव्वञ्चते ॥ २० ॥ नमोव्वञ्चते
परिवञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्प
तयेनमोनमःसृकायिभ्योजिघांसद्भ्योमुष्णताम्पतयेनमोनमो
सिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः ॥ २१ ॥ नमऽउष्णीषि
णेगिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवो
नमोनमऽआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनमऽआयच्छ
द्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्योवि
ध्यद्भ्यश्चवोनमोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमःशयानेभ्य १२

ऽआसी॑नेभ्यश्च॒वो॒नमो॒नम॒स्तिष्ठ॑द्भ्यो॒धाव॑द्भ्यश्च॒वो॒नमो॒नम॑:स॒भा
भ्य॑: ॥ २३ ॥ नम॑:स॒भाभ्य॑:स॒भाप॑तिभ्यश्च॒वो॒नमो॒नमो॒ऽश्वेभ्यो
ऽश्व॑पतिभ्यश्च॒वो॒नमो॒नम॑ऽआव्या॒धिनी॑भ्योवि॒विध्य॑न्तीभ्यश्च॒वो॒न
मो॒नम॒ऽउग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च॒वो॒नमो॒ग॒णेभ्य॑: ॥ २४ ॥ नमो॑
ग॒णेभ्यो॑ग॒णप॑तिभ्यश्च॒वो॒नमो॒व्राते॑भ्यो॒व्रात॑पतिभ्यश्च॒वो॒नमो॒
नमो॒गृत्से॑भ्यो॒गृत्स॑पतिभ्यश्च॒वो॒नमो॒नमो॒विरू॑पेभ्योवि॒श्वरू॑पे
भ्यश्च॒वो॒नमो॒नम॒:सेना॑भ्य: ॥ २५ ॥ नम॒:सेना॑भ्य॒:सेना॒निभ्य॑श्च
वो॒नमो॒नमो॑र॒थिभ्यो॑ऽअर॒थेभ्य॑श्च॒वो॒नमो॒नम॑:क्ष॒त्तृभ्य॑:सङ्ग्रही॒तृ

रु. भ्यश्चवोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमः ॥ २६ ॥ नमस्तक्ष अ.
१३ भ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्म्मारेभ्यश्चवोनमो ५
नमोनिषादेभ्यःपुञ्जिष्ठेभ्यश्चवोनमोनमःश्वनिभ्योमृगयुभ्यश्च
वोनमोनमःश्वभ्यः ॥ २७ ॥ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोन
मोभवायचरुद्रायचनमःशर्वायचपशुपतयेचनमोनीलग्रीवायचशि
तिकण्ठायचनमःकपर्द्दिने ॥ २८ ॥ नमःकपर्द्दिनेचव्युप्तकेशायच
नमःसहस्राक्षायचशतधन्वनेच ॥ नमोगिरिशयायचशिपिविष्टाय
चनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥ नमोह्रस्वायचवा १३

मुनायंचुनमौबृहतेचुवर्षीयसेचुनमौवृद्धायचसुवृधेचुनमोगय्यायचप्प्र
थमायंचुनमंऽआशवे ॥ ३० ॥ नमंऽआशवेचाजिरायंचुनमुःशीगय्याय
चुशीभ्यायचुनमुऽऊर्म्म्यायचावस्वन्न्यायचुनमौनादेयायंचुद्वीप्या
यच ॥ ३१ ॥ नमौज्ज्येष्ठायंचकनिष्ठायंचुनमंःपूर्वुजायंचापरजायंचु
नमौमध्यमायंचापगुल्भायंचुनमौजघन्न्यायचबुध्न्यायचुनमुःसो
भ्याय ॥ ३२ ॥ नमुःसोभ्यायचप्प्रतिसुर्य्यायचुनमोयाम्म्याय
चुक्षेम्म्यायचुनमुःश्लोक्क्यायचावसान्न्यायचुनमंऽउर्वुर्य्यायचुख
ल्ल्यायचुनमोवन्न्याय ॥ ३३ ॥ नमोवन्न्यायचुकक्ष्यायचुनमंः

रु. यंचप्प्रतिश्श्रुवायंचुनमंऽआशुषेंणायचुाशुरंथायचुनमुःश्शूरांयचावभे
१४ दिनैंचुनमोंबिुल्मिमनें ॥ ३४ ॥ नमोंबिुल्मिमनेंचकवुचिनेंचुनमों अ.
वुर्मिमणेंचवुरूथिनेंचुनमंःश्रुतायंचश्रुतसेुनायंचुनमोंदुन्दुभ्यायचा ५
हनुन्न्यायचुनमोंधृष्णवें ॥ ३५ ॥ नमोंधृष्णवेंचप्प्रमृशायंचुनमों
निषुङ्गिणेंचेषुधिमतेंचुनमंस्तीक्ष्णेषंवेचायुधिनेंचुनमंःस्वायुधायंचसु
धन्वंनेच ॥ ३६ ॥ नमुःस्स्रुत्यायंचुपत्थ्यायंचुनमुःकाटचांयचुनी
प्यांयचुनमुःकुल्ल्यांयचसरुस्यायचुनमोंनादेयायंचवैशुन्तायंचुनमुः
कूप्यांय ॥ ३७ ॥ नमुःकूप्यायचावुटयायचुनमोवीद्ध्यांयचातुप्या १४

यचुनमोमेघ्यायचविद्युत्यायचुनमोव्वर्ष्यायचावर्ष्यायंचुनमोव्वा
त्याय ॥ ३८ ॥ नमोव्वात्यायचुरेष्म्म्यायचुनमोव्वास्तव्व्यायचव्वास्तुपाय
चुनमः सोमायचरुद्रायंचुनमस्ताम्रायंचारुणायंचुनमः शङ्गवे ॥ ३९ ॥
नमः शङ्गवेचपशुपतयेचुनमऽउग्रायंचभीमायंचुनमोऽग्रेवधायंचदूरे
वधायंचुनमोहन्त्रेचुहनीयसेचुनमोवृक्षेभ्योहरिकेशेभ्योनमस्तारा
यं ॥ ४० ॥ नमः शम्भवायंचमयोभवायंचुनमः शङ्करायंचमयस्करा
यंचुनमः शिवायंचशिवतरायच ॥ ४१ ॥ नमः पार्य्यायचावार्य्यायचु
नमः प्प्रतरणायचोत्तरणायचुनमस्तीर्थ्यायचुकुल्ल्यायंचुनमः श

ष्प्प्याय च फेन्न्याय च नमः सिकत्त्याय ॥ ४२ ॥ नमः सिकत्त्याय च प्प्रवा
ह्य्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्द्दिने च पुलस्तये च न
मऽइरिण्याय च प्प्रपत्थ्याय च नमो व्व्रज्ज्याय ॥ ४३ ॥ नमो व्व्रज्ज्याय च गो
ष्ठ्याय च नमस्तल्प्प्याय च गेह्य्याय च नमो हृदय्याय च निवेष्प्याय च
नमः काट्ट्याय च गह्वरेष्ठाय च नमः शुष्क्क्याय ॥ ४४ ॥ नमः शुष्क्क्याय च
हरित्याय च नमः पाꣳसव्याय च रजस्याय च नमो लोप्प्याय चोलप्प्या
य च नमऽऊर्व्याय च सूर्व्याय च नमः पर्ण्णाय ॥ ४५ ॥ नमः पर्ण्णाय च प
र्ण्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते च प्प्रखिद

तेचुनमःऽइषुकृद्भ्योधनुष्कृद्भ्यंश्चवोनमोनमोवःकिरिकेभ्योदेवानाᳪं
हृदयेभ्योनमोव्विचिन्वत्केभ्योनमोव्विक्षिणत्केभ्योनमःऽआनिर्हते
भ्यः ॥४६॥ द्रापेऽअन्धसस्पतेदरिद्रनीलंलोहित ॥आसाम्प्रजानामे
षाम्पशूनाम्माभेर्म्मारोङ्मोचनःकिञ्चनाममत् ॥ ४७ ॥ इमारुद्रायत
वसेकपर्द्दिनेक्षयद्वीरायप्प्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदेव्वि
श्श्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातेरुद्रशिवातनूःशिवा
व्विश्श्वाहाभेषजीशिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥ परि
नोरुद्रस्यहेतिर्व्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥ अवस्त्थिरामघ

वंद्भ्यस्तनुष्वुमीढ्वुस्तोकायुतनंयायमृड ॥ ५० ॥ मीढुष्टमुशिवंतम
शिवोनंःसुमनांभव ॥ पुरमेवृक्षऽआयुंधन्निधायुकृत्तिंवसांनुऽआचंरुपि
नांकुम्बिभ्रुदागंहि ॥ ५१ ॥ विकिरिद्रुविलोंहितुनमंस्तेऽअस्तुभगवः ॥
यास्तेंसुहस्रंᳪहेतयोन्यमुस्मान्निवंपन्तुताः ॥ ५२ ॥ सुहस्रांणिसहस्रु
शोबाहोस्तवंहेतयंः ॥ तासामीशांनोभगवःपराचीनामुखांकृधि ॥ ५३ ॥
असंङ्ख्यातासुहस्रांणियेरुद्राऽअधिभूम्म्यांम् ॥ तेषांᳪसहस्रयोजुनेवु
धन्वांनितन्नमासि ॥ ५४ ॥ अुस्मिन्मंहुत्यर्णुवेन्तरिंक्षेभुवाऽअधिं ॥
तेषांᳪसह० ॥ ५५ ॥ नीलंग्ग्रीवाःशितिकण्ठादिवंᳪरुद्राऽउपंश्रिताः ॥ १६

तेषां० ॥ ५६ ॥ नीलंग्ग्रीवाः शितिकण्ठाः शर्व्वाऽअधः क्षमाचराः ॥
तेषां० ॥ ५७ ॥ येवृक्षेषुशष्पिञ्जरानीलंग्ग्रीवाव्विलोहिताः ॥ तेषां०
॥ ५८ ॥ येभूतानामधिपतयोव्विशिखासः कपर्द्दिनः ॥ तेषां० ॥ ५९ ॥
येपथाम्पथिरक्षयऽऐलवृदाऽआयुर्य्युधः ॥ तेषां० ॥ ६० ॥ येतीर्त्थानि
प्प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषां० ॥ ६१ ॥ येन्न्नेषुव्विविद्ध्यन्ति
पात्रेषुपिबतोजनान् ॥ तेषां० ॥ ६२ ॥ यऽएतावन्तश्चभूयाꣳसश्चदि
शोरुद्द्राव्वितस्त्थिरे ॥ तेषां० ॥ ६३ ॥ नमोस्तुरुद्द्रेब्भ्योयेदिवियेषां
व्वर्षमिषवः ॥ तेब्भ्योदशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीची

रु. र्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोय
१७ श्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेभ्योयेन्तरिक्षेयेषां अ.
वातऽइषवः ॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीची ५
र्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मो
यश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६५ ॥ नमोस्तुरुद्रेभ्योयेपृथिव्यां
येषामन्नमिषवः ॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशो
दीचीर्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्वि
ष्म्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥ इतिसंहितायांरुद्र १७

पाठेपञ्चमोऽध्यायः ॥५॥ ॥छ॥ ॥ पुनर्न्नमस्ते इत्यादिषोडश काण्डि
काः पठनीयाः ॥ १६ ॥ एषतैरुद्द्रभागःसुहस्वस्राम्बिकयातञ्जुंषस्वुस्वाहै
षतैरुद्द्रभागऽआखुस्तैपुशुः ॥ १ ॥ अवंरुद्द्रमंदीमुह्यवंदेवन्त्र्यंम्बकम् ॥ य
थांनुोव्वस्यंसुस्करुद्यथांनुःश्रेयंसुस्करुद्यथांनोव्यवसुाययांत् ॥ २ ॥ नमं
स्तेरुद्द्रमुन्न्यवंऽउुतोतुऽइषंवुनमः ॥ बुाहुब्भ्यांमुततुनमः ॥ ३ ॥ यातेरुद्द्र
शिवातुनूरघुोरापांपकाशिनी ॥ तयांनस्तुन्न्वुाशन्तंमयुागिरिंशन्तुाभि
चांकशीहि ।४। नतम्विंदाथुयऽइमाजुजानुान्न्यद्युष्म्माकुमन्तरम्बभूव ।
नीहुारेणप्प्रावृंतुाजल्प्यांचासुतृपंऽउक्थुशासंश्चरन्ति ।५। व्विश्वकंर्म्मुा

रु. ह्यजानिष्टदेवऽआदिद्वैन्धुर्व्वाँऽअभवद्द्वितीयः ॥ तृतीयःपिताजनितौष अ.
१८ धीनामुपाङ्गर्भंव्यदधात्पुरुत्रा ॥ ६ ॥ मीढुष्टमशिवतमशिवोनःसुम ६
नाभव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिंव्वसानऽआचरपिनाकम्बिभ्र
दागहि ॥७॥ विकिरिद्रविलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्र
ठंहेतयोन्यमस्मान्निवपन्तुताः ॥ ८ ॥ सहस्राणिसहस्रशोबाह्वोस्तव
हेतयः ॥ तासामीशानोभगवःपराचीनामुखाकृधि ॥ ९ ॥ अस
ङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्याम् ॥ तेषाँसहस्रयोजनेवध
न्वानितन्मसि ॥ १० ॥ व्वयर्ठसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजा १८

वन्तᳬं सचेमहि ॥ ११ ॥ एषतेरुद्रभागᳬः सहस्वस्राम्बिकयातञ्जुषस्व

स्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ १२ ॥ अवरुद्रमदीमह्यवदेवन्त्र्य

म्बकम् ॥ यथानोवस्यसस्करद्यथानुःश्रेयसस्करद्यथानोव्यवसाय

यात् ॥ १३ ॥ भेषजमसिभेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मे

षायमेष्यै ॥१४॥ त्र्यम्बकँय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारु

कमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥१५॥ त्र्यम्बकँय्यजामहेसुग

न्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतᳬः ॥१६॥

एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि। अवततधन्वापिनाकावसᳬः कृत्ति

वासुऽआहैᳬसन्नः शिवोतांहि ॥ १७ ॥ त्र्यायुषञ्जमदग्नेः कुश्यप
स्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥१८॥ शिवोना
मांसिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिᳬसीः ॥ निवर्त्तयाम्म्या
युषेन्नाद्यायप्रजननायरायस्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥१९॥
उग्रश्चभीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वाँश्चाभियुग्वाचविक्षिपःस्वा
हा ॥२०॥ अग्निᳬहृदयेनाशनिᳬहृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभ
वँय्यक्ना ॥ शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तःपर्शव्ये
नोग्ग्रन्देवँव्वनिष्ठुनावसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥२१॥ उग्ग्रँल्लोहि

तेनमित्रेणुसौब्बंत्येनरुद्रन्दौब्बंत्युनेन्द्रम्प्रक्रीडेनंमुरुतोबलेनसाद्ध्या
प्रमुदा॥भुवस्युकण्ठ्यंरुद्रस्यांन्तःपार्श्व्यम्महादेवस्युयकृच्छर्व
स्यंवनिष्ठुःपशुपतेःपुरीतत्॥२२॥स्वुस्तिनुऽइन्द्रोवृद्धश्रवाःस्वुस्तिनः
पूषाविश्ववेदाः॥ स्वुस्तिनुस्ताक्ष्योऽअरिष्टनेमिःस्वुस्तिनोबृहस्पति
र्दधातु॥२३॥पयःपृथिव्याम्पयुऽओषधीषुपयोदिव्युन्तारिक्षेपयोधाः
॥पयस्वतीःप्रुदिशःसन्तुमह्यम्॥२४॥ विष्णोरुराटमासिविष्णोः
श्नप्त्रैस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवे
त्वा॥२५॥अग्निर्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवोदेव

तांरुद्रादेवतांदित्यादेवतांमरुतोंदेवताविश्वेदेवादेवताबृहस्पतिर्देवते
न्द्रोदेवताव्वरुणोदेवता॥२६॥ द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशा
न्तिरापःशान्तिरोषधयःशान्तिः ॥ व्वनस्पतयःशान्तिर्विश्वेदेवाःशा
न्तिर्ब्रह्मशान्तिःसर्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥
॥२७॥ इतिसꣳहितायांरुद्रपाठेषष्ठोऽध्यायः ॥ ६ ॥ ७ ॥ व्वाजश्चमेप्प्रसु
वश्चमेप्प्रयतिश्चमेप्प्रसितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्चमेश्लोकश्च
मेश्श्रवश्चमेश्श्रुतिश्चमेज्ज्योतिश्चमेस्वश्चमेयज्ञेनकल्पन्ताम् ॥ १ ॥
प्प्राणश्चमेपानश्चमेव्व्यानश्चमेसुश्चमेचित्तञ्चमऽआधीतञ्चमेव्वाक्चमे २०

मनश्चमेचक्षुश्चमेश्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥२॥
ओजश्चमेसहश्चमऽआत्माचमेतनूश्चमेशर्म्मचमेवर्म्मचमेङ्गानिच
मेस्थीनिचमेपरूंषिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनक
ल्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्चमऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमे
मश्चमेम्भश्चमेजेमाचमेमहिमाचमेवरिमाचमेप्रथिमाचमेवर्षिमा
चमेद्राघिमाचमे वृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥ ४ ॥ सुत्त्य
श्च॥ 'नमस्ते'इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ सुत्त्य
श्चमेश्रद्धाचमेजगच्चमेधनञ्चमेविश्वञ्चमेमहश्चमेक्रीडाचमेमोदश्च

मेजातञ्चंमेजनिष्ष्यमांणञ्चमेसूक्तञ्चंमेसुकृतञ्चंमेयुज्ञेनंकल्पन्ताम्॥
॥ ५ ॥ ऋतञ्चंमेमृतंञ्चमेयुक्ष्मञ्चमेनांमयञ्चमेजीवातुश्चमेदीर्ग्घायु
त्वञ्चंमेनामित्रञ्चमेभंयञ्चमेसुगञ्चंमेशयंनञ्चमेसूषाश्चंमेसुदिनञ्चमेयु
ज्ञेनंकल्पन्ताम् ॥ ६ ॥ युन्ताचंमेधुर्त्ताचंमेक्षेमंश्चमेधृतिश्चमेविश्वंञ्च
मेमहंश्चमेसुम्विच्चंमेज्ञात्रंञ्चमेसूश्चंमेप्प्रसूश्चंमेसीरंञ्चमेलयंश्चमेयुज्ञे
नंकल्पन्ताम्॥७॥शञ्चंमेमयंश्चमेप्प्रियञ्चंमेनुकामश्चंमेकामंश्चमेसौ
मनुसश्चंमेभगंश्चमेद्द्रविणञ्चमेभुद्रञ्चंमेश्श्रेयंश्चमेवसीयश्चमेयशंश्चमे
युज्ञेनंकल्पन्ताम्॥८॥ऊर्क्कचं॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नम

काध्यायःपठनीयः ॥ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधु
चमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमे
यज्ञेनकल्पन्ताम् ॥ ९ ॥ रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुचमेप्र
भुचमेपूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेऽक्षितञ्चमेऽन्नञ्चमेऽक्षुच्चमेयज्ञेनक
ल्पन्ताम् ॥ १० ॥ वित्तञ्चमेवेद्यञ्चमेभूतञ्चमेभविष्यच्चमेसुगञ्चमे
सुपथ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमेसुम
तिश्चमेयज्ञेनकल्पन्ताम् ॥ ११ ॥ व्रीहयश्चमेयवाश्चमेमाषाश्चमेतिला
श्चमेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्चमेऽणवश्चमेश्यामाकाश्चमेनी

वारांश्चमेगोधूमांश्चमेमुसूरांश्चमेयुज्ञेनंकल्पन्ताम् ॥ १२ ॥ अश्मां
च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ अश्मां
चमेमृत्तिकाचमेगिरयंश्चमेपर्वताश्चमेसिकताश्चमेवनुस्पतयश्चमेहिरं
ण्यञ्चमेयश्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुंचमेयुज्ञेनंकल्पन्ताम्
॥ १३ ॥ अग्निश्चमेऽआपश्चमेवीरुधश्चमेऽओषधयश्चमेकृष्टपच्या
श्चमेकृष्टपच्याश्चमेग्राम्म्याश्चमेपशवऽआरुण्याश्चमेवित्तञ्चमेवित्ति
श्चमेभूतञ्चमेभूतिश्चमेयुज्ञेनंकल्पन्ताम् ॥ १४ ॥ वसुचमेवसुतिश्च
मेकर्म्मचमेशक्तिश्चमेर्थश्चमेऽएमश्चमऽइत्याचमेगतिश्चमेयुज्ञेनंक

ल्पन्ताम् ॥१५॥ अग्निश्चं मुऽइन्द्रश्चं ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्म
को नमकाध्यायः पठनीयः ॥ अग्निश्चं मुऽइन्द्रंश्च मेसोमंश्च मुऽइन्द्रंश्च
मेसविताचंमुऽइन्द्रंश्च मेसरंस्वतीचमुऽइन्द्रंश्च मेपूषाचंमुऽइन्द्रंश्च मेबृ
हस्पतिंश्च मुऽइन्द्रश्च मेयुज्ञेनंकल्पन्ताम् ॥१६॥ मित्रश्चंमुऽइन्द्रंश्च मेव
रुणश्च मुऽइन्द्रंश्च मेधाताचंमुऽइन्द्रंश्च मेत्वष्टांचमुऽइन्द्रंश्च मेमुरुतंश्च
मुऽइन्द्रश्च मेविश्वेंचमेदेवाऽइन्द्रंश्च मेयुज्ञेनंकल्पन्ताम्॥१७॥ पृथिवी
चंमुऽइन्द्रंश्च मेन्तरिंक्षश्चमुऽइन्द्रंश्च मेद्यौश्चमुऽइन्द्रंश्च मेसमाश्च मुऽइ
न्द्रंश्च मेनक्षत्राणिचमुऽइन्द्रंश्च मेदिशंश्च मुऽइन्द्रंश्च मेयुज्ञेनंकल्पन्ता

रु. म्॥ १८॥ अꣳशुश्च॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठ अ.
२३ नीयः। अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मऽउपाꣳशुश्च मेऽन्त ७
र्यामश्च मऽऐन्द्रवायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्रतिप्रस्था
नश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम्॥ १९॥ आग्रयणश्च मे वै
श्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरु
त्वतीयाश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च
मे हारियोजनश्च मे यज्ञेन कल्पन्ताम्॥ २०॥ स्रुचश्च मे चमसाश्च मे वाय
व्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च मऽआध २३

वनीयश्च मे होदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥ २१ ॥

अग्निश्च मे घर्मश्च ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः ॥ अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्य्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥ २२ ॥

व्रतञ्च मऽऋतवश्च मे तपश्च मे सम्वत्सरश्च मेऽहोरात्रेऽऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥ २३ ॥ एकाच ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः ॥ एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च

रु. मुप ञ्चंचमेसुप्तचंमेसुप्तचंमुनवचमुनवंचमुऽएकादशचमुऽएकादश
२४ चमुत्रयोंदशचमुत्रयोंदशचमुपञ्चंदशचमुपञ्चंदशचमेसुप्तदशचमेसु अ.
प्तदंशचमुनवंदशचमुनवंदशचमुऽएकंविंठंशतिश्चमुऽएकंविंठंशति ७
श्चमुत्रयोंविंठंशतिश्चमुत्रयोंविंठंशतिश्चमुपञ्चंविंठंशतिश्चमुपञ्चविंठं
शतिश्चमेसुप्तविंठंशतिश्चमेसुप्तविंठंशतिश्चमुनवंविंठंशतिश्चमुनवं
विंठंशतिश्चमुऽएकांत्रिंठंशच्चमुऽएकंत्रिंठंशच्चमुत्रयंस्त्रिंठंशच्चमेयुज्ञेनं
कल्पन्ताम् ॥ २४ ॥ चतंस्रश्च ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्म
को नमकाध्यायः पठनीयः ॥ चतंस्रश्चमुष्टौचंमुष्टौचंमुद्वादंशचमुद्वा २४

दंशश्च मे षोडशश्च मे षोडशश्च मे विंशतिश्च मे विंशतिश्च मे चतुर्विंशतिश्च मे चतुर्विंशतिश्च मेऽष्टाविंशतिश्च मेऽष्टाविंशतिश्च मे द्वात्रिंशच्च मे द्वात्रिंशच्च मे षट्त्रिंशच्च मे षट्त्रिंशच्च मे चत्वारिंशच्च मे चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मेऽष्टाचत्वारिंशच्च मे यज्ञेन कल्पन्ताम् ॥ २५ ॥ त्र्यविश्च ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥ २६ ॥ पृष्ठवाट् च मे पष्ठौ

हीचंमऽउक्षाचंमेव्वुशाचंमऽऋषुभश्चंमेव्वेहच्चंमेनुड्वाँश्चंमेधेनुश्चमेयुज्ञेन
कल्पन्ताम् ॥ २७ ॥ व्वाजांयुस्वाहां ॥ अत्र "गणानान्त्वा" इत्यत
आरभ्य नमकाध्यायन्तमध्यायपञ्चकं पठनीयम् ॥ व्वाजांयुस्वाहांप्प्रसु
वायुस्वाहांपिुजायुस्वाहाक्क्रतंवेुस्वाहाव्वसंवेुस्वाहांहुर्प्पतंयेुस्वाहाह्नेमु
ग्धायुस्वाहांमुुग्धायंव्वैनठ्ठंशिुनायुस्वाहाव्विनुठ्ठंशिनंऽआन्त्यायुनायु
स्वाहान्त्यांयभौवुनायुस्वाहाभुवंनस्युपतंयेुस्वाहाधिंपतयेुस्वाहांप्प्र
जापंतयेुस्वाहां ॥ इयन्तेुराण्मुत्रायंयुन्तासियमंनऽऊर्जेत्वावृष्ट्यैत्वा
प्प्रुजानुन्त्वाधिंपत्याय ॥ २८ ॥ आयुर्युज्ञेनंकल्पतांम्प्प्राणोयुज्ञेनं

कल्प्पताञ्चक्षुर्युज्ञेनंकल्प्पताᳫंश्श्रोत्रॅंठ्युज्ञेनंकल्प्पताम्वाग्ग्युज्ञेनंक
ल्प्पताम्मनोयुज्ञेनंकल्प्पतामात्त्मायुज्ञेनंकल्प्पताम्ब्रह्मायुज्ञेनंक
ल्प्पताञ्ज्योतिर्युज्ञेनंकल्प्पताᳫंस्वर्युज्ञेनंकल्प्पताम्पृष्ठॅंठ्युज्ञेनंक
ल्प्पतॉंठ्युज्ञोयुज्ञेनंकल्प्पताम्॥स्तोमंश्चुयजुंश्चुऽऋक्चुसामंचबृहच्चर
थन्तुरञ्चं ॥ स्वर्देवाऽअगन्मामृताऽअभूमप्प्रजापतेःप्प्रजाऽअभूमुवेट्
स्वाहा॥२९॥ इतिसर्ठहितायांरुद्रपाठेसप्त० ॥७॥ ऋचुंवाचुम्प्रपंद्ये
मनोयजुःप्प्रपंद्येसामंप्प्राणम्प्रपंद्येचक्षुःश्श्रोत्त्रम्प्रपंद्येवागोजंःसुहौ
जोमयिप्प्राणापानौ ॥ १ ॥ यन्मेछिद्द्रञ्चक्षुषोहृदंयस्युमनंसोवाति

रु. तृण्णुम्बृहुस्प्पतिर्म्मेतद्दधातु ॥ शन्नोभवतुभुवनस्ययस्प्पतिः ॥२॥ भूर्भु अ.
२६ वुःस्वःतत्सवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्यधीमहिधियोयोनःप्प्रचोदयात् ८
॥३॥ कयानश्चित्रऽआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥४॥
कस्त्वासत्योमदानाम्मंहिष्ठोमत्सदन्धसः ॥ दृढाचिदारुजेव्वसु ॥५॥
अभीषुणःसखीनामविताजरितृणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥
कयात्वन्नऽऊत्याभिप्प्रमन्दसेवृषन् ॥ कयास्तोतृब्भ्यऽआभर ॥७॥
इन्द्रोव्विश्वस्यराजति ॥ शन्नोऽअस्तुद्विपदेशञ्चतुष्प्पदे ॥ ८ ॥ शन्नो
मित्रःशंव्वरुणःशन्नोभवत्त्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्पतिःशन्नोव्विष्णु २६

रुरुक्रमः ॥ ९ ॥ शन्नोवातः पवताᳬं शन्नस्तपतुसूर्य्यः ॥ शन्नःकनि
क्रदद्देवः पर्ज्जन्योऽअभिवर्षतु ॥१०॥अहानिशम्भवन्तुनः शᳬंरात्रीः प्प्र
तिधीयताम् ॥ शन्नऽइन्द्राग्नीभवतामवोभिः शन्नऽइन्द्रावरुणारातह
व्या॥शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासुवितायशँय्योः॥११॥
शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शँय्योरभिस्रवन्तुनः॥ १२॥
स्योनापृथिविनोभवानृक्षरानिवेशनी॥यच्छानःशर्म्मसप्रथाः॥१३॥
आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ १४ ॥
योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५ ॥

तस्म्मुाऽअरंङ्गमामवोयस्युक्षयांयुजिन्न्वंथ ॥ आपोंजुनयंथाचनः १६ ॥
द्यौःशान्तिरुन्तरिक्षुठंशान्तिः पृथिवीशान्तिुरापुःशान्तिरोषंधयुःशा
न्तिः ॥ व्वनुस्प्पतंयुःशान्तिर्व्विश्वेंदुवाःशान्तिर्ब्रह्ममुशान्तिुःसर्ब्बुठंशा
न्तिुःशान्तिरेवशान्तिुःसामुाशान्तिरेुधि ॥ १७ ॥ दृतेुदृठंहंमामिुत्रस्यं
मुाचक्षुंषुासर्व्वांणिभूतानिुसमींक्षन्ताम् ॥ मिुत्रस्युाहञ्चक्षुंषुासर्व्वांणिभू
तानिुसमींक्षे ॥ मिुत्रस्युचक्षुंषुासमींक्षामहे ॥ १८ ॥ दृतेुदृठंहंमाज्ज्यों
क्कैसुन्दृशिंजीव्व्यासुञ्ज्योक्कैसुन्दृशिंजीव्व्यासम् ॥ १९ ॥ नमंस्तुहर
सेशुोचिषेुनमंस्तेऽअस्त्वुर्च्चिषें ॥ अुन्न्याँस्तेंऽअुस्मत्तंपन्तुहेुतयंःपावु

काऽअस्म्मब्भ्यर्ठंशिवाभव ॥२०॥ नमस्तेऽअस्तुव्विद्युतेनमस्तेस्तन
यित्त्नवे॥नमस्तेभगवन्नस्तुयतःस्वःसमीहसे ॥२१॥ यतोयतःसमीह
सेततोनोऽअभयङ्कुरु ॥शन्नःकुरुप्प्रजाब्भ्योभयन्नःपशुब्भ्यः॥ २२॥
सुमित्त्रियानऽआपऽओषधयःसन्तुदुर्म्मित्त्रियास्तस्म्मैसन्तुयोस्म्मा
न्द्वेष्टियञ्चवयन्द्विष्म्मः ॥२३॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत्॥
पश्येमशरदःशतञ्जीवेमशरदःशतर्ठंशृणुयामशरदःशतम्प्रब्ब्रवामश
रदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदःशतात् ॥ २४ ॥
इतिसर्ठंहितायांरुद्द्रपाठेऽष्टमोऽध्यायः ॥८॥ ॥ॐ नमः शिवाय ॥

॥ इति श्रीजयपुरनिवासिपंडितश्रीमाधवप्रसादकृतसुव्यवस्थाशोधना रुद्री समाप्ता ॥

॥ श्रीगणेशायनमः ॥ ॥ जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरी-वि
लोलवीचिवल्लरीविराजमानमूर्धनि ॥ धगद्धगद्धगज्ज्वलल्ललाटपट्टपा
वके किशोरचंद्रशेखरेरतिःप्रतिक्षणंमम ॥ १ ॥ धराधरेंद्रनंदिनीवि
लासबंधुबंधुर-स्फुरद्दिगंतसंततिप्रमोदमानमानसे ॥ कृपाकटाक्षधो
रणीनिरुद्धदुर्धरापदि क्वचिच्चिदंबरेमनोविनोदमेतुवस्तुनि ॥ २ ॥ ज
टाभुजंगपिंगलस्फुरत्फणामणिप्रभा-कदंबकुंकुमद्रवप्रलिप्तदिग्वधूमु
खे ॥ मदांधसिंधुरस्फुरत्त्वगुत्तरीयमेदुरे मनोविनोदमद्भुतंबिभर्तुभूत
भर्तरि ॥ ३ ॥ सहस्रलोचनप्रभृत्यशेषलेखशेखर-प्रसूनधूलिधोरणीवि

धूसरांघ्रिपीठभूः ॥ भुजंगराजमालयानिबद्धजाटजुटकः श्रियेचिराय
जायँतांचकोरबंधुशेखरः ॥ ४ ॥ ललाटचत्वरज्वलद्धनंजयस्फुलिंग
भा-निपीतपंचसायकंनमन्निलिंगनायकम् ॥ सुधामयूखलेखयाविरा
जमानशेखरं महःकपालिसंपदेशिरोजटालमस्तुनः ॥ ५ ॥ करालभाल
पट्टिकाधगद्धगद्धगज्ज्वल-द्धनंजयाधरीकृतप्रचंडपंचसायके ॥ धराध
रेंद्रनंदिनीकुचाग्रचित्रपत्रक-प्रकल्पनैकशिल्पिनित्रिलोचनेमतिर्मम
॥ ६ ॥ नवीनमेघमंडलीनिरुद्धदुर्धरस्फरत्-कुहूनिशीथिनीतमःप्रबंध
बंधुकंधरः ॥ निलिम्पनिर्झरीधरस्तनोतुकृत्तिसिंधुरः कलानिधानबं

धुरःश्रियंजगद्धुरंधरः ॥ ७ ॥ प्रफुल्लनीलपंकजप्रपंचकालिमच्छटा-वि
डंबिकंठकंधरारुचिप्रबंधकंधरम् ॥ स्मरच्छिदंपुरच्छिदंभवच्छिदंम
खच्छिदं गजच्छिदांधकच्छिदंतमंतकच्छिदंभजे ॥ ८ ॥ अगर्वसर्व
मंगलाकलाकदम्बमंजरी-रसप्रवाहमाधुरीविजृंभणामधुव्रतम् ॥ स्म
रांतकंपुरांतकंभवांतकंमखांतकं गजांतकांधकांतकंतमंतकांतकंभजे
॥ ९ ॥ जयत्वदभ्रविभ्रमभ्रमद्भुजंगमस्फुरद्-धगद्धगद्धिनिर्गमत्कराल
भालहव्यवाट् ॥ धिमिद्धिमिद्धिमिद्ध्वनन्मृदंगतुंगमंगल-ध्वनिक्रमप्रव
र्तितप्रचण्डताण्डवःशिवः ॥ १० ॥ दृषद्विचित्रतल्पयोर्भुजंगमौक्ति

कस्रजोर्वरिष्ठरत्नलोष्ठयोःसुहृद्विपक्षपक्षयोः ॥ तृणारविंदच्चक्षुषोःप्र
जामहीमहेन्द्रयोः समंप्रवर्तयन्मनःकदासदाशिवंभजे ॥ ११ ॥ कदा
निलिंपनिर्झरीनिकुंजकोटरेवसन् विमुक्तदुर्मतिःसदाशिरःस्थमंज
लिंवहन् ॥ विमुक्तलोललोचनोललामभाललग्नकः शिवेतिमंत्रमुच्चर
न्कदासुखीभवाम्यहम् ॥ १२ ॥ इदंहिनित्यमेवमुक्तमुत्तमोत्तमंस्त
वं पठन्स्मरन्ब्रुवन्नरोविशुद्धिमेतिसंततम् ॥ हरेगुरौसुभक्तिमाशुया
तिनाऽन्यथागतिं विमोहनंहिदेहिनांसुशंकरस्यचिंतनम् ॥ १३ ॥
पूजाऽवसानसमयेदशवक्त्रगीतं यःशंभुपूजनमिदंपठतिप्रदोषे ॥ त

स्यास्थिरांरथगजेंद्रतुरंगयुक्तां लक्ष्मींसदैवसुमुखींप्रददातिशंभुः१४॥

इति श्रीरावणविरचितं शिवतांडवस्तोत्रं संपूर्णम् ॥ ॥ ॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाःशरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः॥ संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलंशंभोतवाराधनम् १

इदं पुस्तकं मुम्बय्यां खेमराजश्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालये

मुद्रयित्वा प्रकाशितम् ।

संवत् २०३४ शके १८९९

मुद्रक और प्रकाशक–

खेमराज श्रीकृष्णदास,

अध्यक्ष–'श्रीवेंकटेश्वर' प्रेस ७ वीं खेतवाडी, बम्बई ४ के लिये दे० स० शर्मा मैनेजर द्वारा मुद्रित।

पुनर्मुद्रणादि सर्वाधिकार "श्रीवेंकटेश्वर" मुद्रणयन्त्रालयाध्यक्षाधीन है।

इति

शुक्लयजुर्वेदीयषडङ्गरुद्राष्टाध्यायी

समाप्ता ।